# मित्रलाभः

## द्वितीयो भागः

**अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण स पण्डितोऽब्रवीत्-भो राजपुत्राः श्रृणुत -**

**व्याख्या-** अथ=एतदनन्तरम्, प्रासादपृष्ठे=राजभवनस्योपरिभागे, सुखोपविष्टानाम्=अक्लेशेनस्थितानाम्, राजपुत्राणां=राजकुमाराणाम्, पुरस्तात्=अग्रे, प्रस्तावक्रमेण=कथामाध्यमेन, सः=विष्णु शर्मा, पण्डितः=विद्वान्, अब्रवीत्=अवोचत्। भो राजपुत्राः = अये राजकुमाराः, श्रृणुत=आकर्णयत।

**व्याकरणम्-**

**समासः-**प्रासादपृष्ठे=प्रासादस्य पृष्ठं प्रासादपृष्ठं, तस्मिन्। सुखोपविष्टानाम्=सुखम् उपविष्टाः सुखोपविष्टाः, तेषाम्। राजापुत्राणाम्=राज्ञः पुत्राः राजपुत्राः तेषाम्। प्रस्तावक्रमेण=प्रस्तावस्य क्रमः प्रस्तावक्रमः, तेन।

**सन्धिविच्छेदः-**सुखोपविष्टानाम्=सुख+उपविष्टानाम्। स पण्डितोऽब्रवीत् =सः+पण्डितः+अब्रवीत्।

**प्रकृति प्रत्ययः-**उपविष्टानाम्=उप+विश्+क्त(त)+आम्।

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥1॥**

**प्रसङ्गः-**अत्र धीमतां मूर्खाणाः। समयः पृथक्-पृथक् रूपेण व्ययो भवतीति वर्णितम्।

**अन्वयः-**धीमतां कालः काव्यशास्त्रविनोदेन गच्छति, मूर्खाणां (कालस्तु) व्यसनेन, निद्रया , कलहेन वा (गच्छति)

**व्याख्या-**धीमताम्=विदुषां बुद्धिमतां वा, कालः=समयः, काव्यशास्त्रविनोदेन=रसान्वितशास्त्रानन्देन, गच्छति=याति व्यतीतो भवति वा, मूर्खाणाम्= अनधीतशास्त्राणाम्, कालस्तु=समयस्तु, व्यसनेन=सुरापानद्यूतक्रीडादिना, निद्रया= शयनाधिक्येन, कलहेन=परस्परविवादेन, वा=अथवा, गच्छति=व्यतीतो भवति।

**सरलार्थः-**इह जगति विदुषां जीवनकालं साहित्यव्याकरणादिशास्त्राणामध्ययने व्यतीतो भवति, एवःानधिगतशास्त्राणां नृणां समयः सुरापाने, द्यूतक्रीडायां, दिवा निद्रायां परस्परं विवादेषु च निष्प्रयोजनमेव व्ययो भवतीति ।

**व्याकरणम्-**

**समासः-**काव्यशास्त्रविनोदेन=कवेः कर्म काव्यं, तदेवशास्त्रम् इति काव्यशास्त्रम् तेन यो विनोदः काव्यशास्त्रविनोदः, तेन। व्यसनेन=व्यस्यते चित्तम् अनेनेति व्यसनम् , तेन।

**सन्धि विच्छेदः**-कालो गच्छति=कालः गच्छति।

**प्रकृति प्रत्ययः**-धीमताम्=धी+मतुप् (मत्)+आम्। व्यसनेन=वि+अस्+ ल्युट् (अन)+टा(इन)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि। राजपुत्रैरुक्तम्-आर्य! कथ्यताम्। विष्णुशर्मोवाच-शृणुत। सम्प्रति मित्रलाभःप्रस्तूयते, यस्यायमाद्यः श्लोकः-**

**व्याख्या-** तत्=तस्मात् कारणात्, भवताम्=युष्माकम्, विनोदाय=आनन्द-प्राप्त्यर्थम्, काककूर्मादीनाम्= वायसकच्छपहिरणमूषिकादीनाम्, विचित्राम्=आश्चर्य-युक्ताम्, कथाम्=आख्यायिकाम्, कथयामि=ब्रवीमि। राजपुत्रैः= राजकु मारैः, उक्तम्= भणितम्, आर्य!=पूज्य!, कथ्यताम्=उच्यताम्। विष्णुशर्मोवाच=विष्णुशर्मानाम पण्डितोऽवोचत्, शृणुत=ध्यानपूर्वकमाकर्णयत, सम्प्रति=अधुना, मित्रलाभः= एतन्नामधेयः प्रथमपरिच्छेदः, प्रस्तूयते=आरभ्यते, यस्य=एतस्य (मित्रलाभस्य), अयम् =एषः, आद्यः=प्रथमः, श्लोकः=पद्यमस्तीति।

**व्याकरणम्-**

**समासः**-काककूर्मादीनाम्=काकश्च कूर्मश्च काककूर्मौ तौ आदिः येषां ते काककूर्मादयः, तेषाम्। राजपुत्रैः=राज्ञः पुत्राःराजपुत्राः तैः।

**सन्धिविच्छेदः**-राजपुत्रैरुक्तम्=राजपुत्रैः+उक्तम्। विष्णुशर्मोवाच=विष्णु-शर्मा+उवाच। यस्यायमाद्यः= यस्य+अयम्+आद्यः।

**प्रकृति प्रत्ययः**-उक्तम=वच्+क्त(त) । शर्मा=शृ+मनिन् (मन्)।

**असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः।**
**साधयत्याशु कार्याणि काककूर्ममृगाखुवत्॥2॥**

**प्रसङ्गः**-कार्यसिद्धये बुद्धिमत्तायाः मित्रतायाश्च महती आवश्यकता भवति।

**अन्वयः**-असाधनाः वित्तहीनाः बुद्धिमन्तः सुहृत्तमाः काककूर्ममृगाखुवत् कार्याणि आशु साधयन्ति।

**व्याख्या**-असाधनाः=साधनरहिताः, वित्तहीनाः=धनशून्याः, बुद्धिमन्तः= ज्ञानवन्तः, सुहृत्तमाः=अतिशयेन सुहृदः, काककूर्ममृगाखुवत्=वायसकच्छपहरिणमूषिकसदृशाः, कार्याणि=कृत्यानि, आशु=शीघ्रम्, साधयन्ति= निष्पादयन्ति ।

**सरलार्थः**-वायसकच्छपमृगमूषिकवत् ये जनाः साधनशून्याः, धनहीनाः भवन्तोऽपि बुद्धिमन्तः सुहृदश्च सन्ति नूनमेव ते शीघ्रं कार्याणि साधयन्ति।

**व्याकरणम्-**

**समासः**-असाधनाः=न विद्यन्ते साधनानि येषां ते असाधनाः। बुद्धिमन्तः= बुद्धिः विद्यन्ते येषां ते। सुहृत्तमाः=शोभनं हृदयं येषां ते सुहृदः अतिशयेन सुहृद इति सुहृत्तमाः। काककूर्ममृगाखुवत्=काकश्च कूर्मश्च मृगश्च आखुश्च इति काककूर्ममृगाखवः ते इव इति।

**सन्धिविच्छेदः**-साधयन्त्याशु=साधयन्ति+ आशु।

**प्रकृति प्रत्ययः**-बुद्धिमन्तः=बुद्धि+मतुप् (मत्)+जस्(अस्)।

**छन्दः**-अत्र अनुष्टुप् नामवृत्तं वर्तते।

**राजपुत्रा ऊचुः-कथमेतत्? सोऽब्रवीत्=अस्ति गोदावरी तीरे विशालः शाल्मलीतरुः। तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचिद् अवसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनी-नायके चन्द्रमसि लघुपतनकनामावायसः प्रबुद्धः कृतान्तमिव द्वितीयमटन्तं पाशहस्तं व्याधमपश्यत्। तमालोक्याऽचिन्तयत्-अद्य प्रातरेवाऽनिष्टदर्शनं जातं न जाने किमनभिमतं दर्शयिष्यति, इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः।**

**व्याख्याः-** राजपुत्राः=राजकुमाराः, ऊचुः=कथयामासुः, कथम्=केन प्रकारेण, एतत्=इदम्, (अस्ति) सः=विष्णुशर्माआचार्यः, अब्रवीत्=उवाच गोदावरीतीरे= गोदावरीनद्यास्तटे, विशालः=स्थूलकायः, शाल्मलीतरुः= एतदाख्यः वृक्षः (लोके 'सेमल' इति नाम्ना प्रसिद्धः) अस्ति=आसीत् (वाक्यादौ 'अस्ति' इतिपदं भूतार्थे प्रयुज्यते) तत्र=तस्मिन् (वृक्षे ) नानादिग्देशात्=विभिन्नदिग्भ्यो देशेभ्यश्च, आगत्य= समागत्य रात्रौ=निशायाम्, पक्षिणः=खगाः, निवसन्ति=निवासं कुर्वन्ति। अथ= अनन्तरम्, कदाचित्=कस्मिन्नपि काले, अवसन्नायाम्=व्यतीतायाम्, रात्रौ=क्षपायाम्, अस्ताचलचूडावलम्बिनि = अस्तशिखराश्रिते सति, भगवति = ऐश्वर्यशालिनि, कुमुदिनीनायके= कमलिनी स्वामिनि, चन्द्रमसि=रजनीकरे, लघुपतनकनामावायसः= एतदाख्यो वायसः, प्रबुद्धः=सुप्तोत्थितः सन्, कृतान्तमिव=मृत्युपतिमिव, द्वितीयम्= अन्यम्, अटन्तम्=आगच्छन्तम्, पाशहस्तम्=हस्तधृतजालम्, व्याधम्=लुब्धकम्, अपश्यत्=अवलोकयत्। तमवलोक्य=व्याधं दृष्ट्वा, अचिन्तयत्=विचारं कृतवान्। अद्य=अस्मिन् दिवसे, प्रातरेव=प्रातःकाले एव, अनिष्टदर्शनम्=अशुभावलोकनम्, जातम्=अभवत्, न जाने=नैव जानामि, किमनभिमतम्=किम् अमङ्गलम्, दर्शयिष्यति= उपस्थापयिष्यति, इत्युक्त्वा=इत्थं कथयित्वा, तदनुसरणक्रमेण=तस्य (व्याधस्य) पश्चाद्गमनविधिना, व्याकुलः= खिन्नचेतः, चलितः=अचलत्।

**व्याकरणम्-**

**समासः-**गोदावरीतीरे=गोदावर्याः तीरं गोदावरी तीरम्, तस्मिन्। अस्ताचलचूडावलम्बिनि=अस्ताचलस्य चूडा, अस्ताचलचूडा, तद् अवलम्बते इति अस्ताचलचूडावलम्बि, तस्मिन्। व्याकुलः=विशेषेण आकुलः।

**सन्धिविच्छेदः-**सोऽब्रवीत्=सः+अब्रवीत्। नानादिग्देशादागत्य=नानादिक् +देशात्+आगत्य। पक्षिणो निवसन्ति=पक्षिणः+निवसन्ति। तमालोक्याचिन्तयत्=तम् +आलोक्य+अचिन्तयत्। प्रातरेवानिष्टदर्शनम्=प्रातः+एव+ अनिष्टदर्शनम्। इत्युक्त्वा =इति+उक्त्वा । व्याकुलश्चलितः=व्याकुलः+चलितः।

**प्रकृति प्रत्ययः-**आगत्य=आ+गम्+ल्यप् (य)। आलोक्य=आङ्+लुक् +ल्यप् (य)। अटन्तम्=अट् शतृ(अत्) अम्। दर्शनम्=दृश्+ल्युट् (यु=अन)। उक्त्वा =वच्+क्त्वा (त्वा)। चलितः=चल्+(इट्) क्त (त)।

यतः- **शोकस्थानसहस्राणि भयस्थानशतानि च।**
**दिवसे-दिवसे मूढमाविशन्ति न पण्डितम्॥3॥**

**प्रसङ्गः-**शोकभयादीनां कारणानां प्रभावो मूर्खोपरि बाहुल्येन आयाति, किन्तु विद्वत्सु तेषां प्रभावो न दृश्यते।

**अन्वयः-**शोकस्थानसहस्राणि भयस्थानशतानि च दिवसे दिवसे मूढम् आविशन्ति, पण्डितं न ( आविशन्ति)

**व्याख्या-**यतः=यतोहि, शोकस्थानसहस्राणि=परितापस्यसहस्रशः आस्पदानि (सन्ति), भयस्थानशतानि= भयोत्पादकानि शतशः निमित्तानि (सन्ति), च =तथा, दिवसे-दिवसे=प्रतिदिनम्, मूढम्=ज्ञानशून्यम्, आविशन्ति=व्याकुली कुर्वन्ति, (किन्तु) पण्डितं न=बुद्धिमन्तं पुरुषं नैव, ( आविशन्ति=पराभवन्ति)।

**सरलार्थः-**अस्मिन् जगति मनुष्याणां पुरतः सहस्राणि शोकस्थानानि, शतानि भयोत्पादकानि आस्पदानि च समायान्ति, किन्तु तानि मूर्खाणां कृते एव भवन्ति, न तु विदुषाम्। यतोहि विद्वांसो निजबुद्धिबलेन तानि नाशयितुं समर्थाः भवन्ति।

**व्याकरणम्-**

**समासः-**शोकस्थान-सहस्राणि=शोकस्य स्थानानि शोकस्थानानि, तेषां सहस्राणि।

**सन्धि विच्छेदः-**मूढमाविशन्ति=मूढम्+आविशन्ति।

**प्रकृति-प्रत्ययः**-मूढम्=मूह्+क्त(त)। आविशन्ति=आ+विश्+झि (अन्ति) पण्डितम्=पण्डा+इतच् (इत)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अन्यच्च-विषयिणामिदमवश्यं कर्तव्यम्-**

**उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्।**
**मरणव्याधिशोकानां किमद्य निपतिष्यति ॥4 ॥**

**प्रसङ्गः-**प्रातःकाले प्रतिदिनमुत्थाय भयमरणव्याधीनां विषये नूनं चिन्तनीयम्।

**अन्वयः-**उत्थाय उत्थाय अद्य-मरण-व्याधि-शोकानां (मध्ये) किं निपतिष्यति (इति यद्) महद् भयम् उपस्थितं (तद्) बोद्धव्यम्।

**व्याख्या-**अन्यच्च=अपि च, विषयिणाम्=गृहस्थानाम्, इदम्=एतत् (वक्ष्यमाणम्) अवश्यम्=नूनमेव, कर्तव्यम्=करणीयम्। उत्थाय-उत्थाय=प्रतिदिनं शयनात् प्रबुध्य, अद्य=अस्मिन् दिने, मरणव्याधिशोकानाम्= मृत्युरोगानुतापानां (मध्ये= अन्तराले) किं निपतिष्यति=किम् आगमिष्यति, (इति यत्=इत्येवं प्रकारेण यत्) महद् भयम्=अतिदारुणं भयकारणम्, उपस्थितम्=समागतम्, (तत्=तत्सर्वम्) बोद्धव्यम्= ज्ञातव्यम्।

**सरलार्थः-**प्रतिदिनं प्रातः काले शय्यां परित्यज्य एतच्चिन्तनीयं यद् अस्मिन् दिवसे मृत्युशोकभयेषु एतेषु त्रिषु कस्यागमनं भविष्यति। एतदर्थं दारुणभयस्य कारणं सम्यग् विचार्य कार्येषु प्रवर्तेत।

**व्याकरणम्-**

**समासः-**मरणव्याधिशोकानाम्=मरणं च व्याधिश्च शोकश्च मरणव्याधिशोकाः, तेषाम्।

**सन्धिविच्छेदः-**अन्यच्च=अन्यत्+च। उत्थायोत्थाय = उत्थाय + उत्थाय। महद्भयमुपस्थितम्=महत्+ भयम्+उपस्थितम्।

**प्रकृति प्रत्ययः-**उत्थाय=उत्+स्था+ल्यप् (य)। उपस्थितम्=उपस्था+क्त (त)। मरणम्=मृ+ल्युट् (यु=अन)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णम्। स च तत्र प्रछन्नो भूत्वा स्थितः।अस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तान् तण्डुलकणान् अवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह-कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि प्रायेणाऽनेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम्।**

**व्याख्या**-अथ=किःितृकालानन्तरम्, तेन व्याधेन=पूर्वोक्तेन लुब्धकेन, तण्डुलकणान्=तण्डुलखण्डान्, विकीर्य=भूमौ प्रसार्य, जालं=पाशम्, विस्तीर्णम्= प्रसारितम्। स च=व्याधश्च, प्रच्छन्नो भूत्वा=निलीय, स्थितः=अतिष्ठत्। अस्मिन्नेव काले=एतस्मिन्नेव समये, चित्रग्रीवनामा=चित्रग्रीव नामकः, कपोतराजः=पारावतनृपः, सपरिवारो=सकुटुम्बम्, वियति=आकाशे, विसर्पन्=गच्छन्, तान् तण्डुलान्=पृथिव्यां निक्षिप्तान् तण्डुलखण्डान्, अवलोकयामास=दृष्टवान्। ततः = तण्डुलकणदर्शनानन्तरम्, कपोतराजः = पारावतनृपः, तण्डुलकणलुब्धान् = तण्डुलखण्डभक्षणोन्मुखान्, कपोतान्=पारावतान्, प्रत्याह=प्रत्यकथयत्, कुतः=कस्मात् स्थानात्, अत्र=अस्मिन्, निर्जने=पुरुषहीने, वने=कानने, तण्डुलकणानाम्=तण्डुलखण्डानाम्, सम्भवः=उत्पतिः? तत्=तस्मात् कारणात्, निरूप्यताम्=विचार्यताम्, तावत्=सर्वादौ। इदम्=एषां भक्षणम् भद्रं=हितकरम्, न=नैव, पश्यामि=अवलोकयामि, प्रायेण=बाहुल्येन, अनेन=एतेन, तण्डुलकणलोभेन=तण्डुलखण्डलाभेच्छया, अस्माभिरपि=सर्वैरपि पारावतैः, तथा=तेन प्रकारेण, भवितव्यम्=भाव्यम्। (तथा भवितव्यम् इत्यस्यान्वयः स पथिके यथा मृतः इत्यनेन भवतीति ज्ञेयः)

**व्याकरणम्-**

**समासः-**तण्डुलकणान्=तण्डुलानां कणाः तण्डुलकणाः तान्। सपरिवारः= परिव्रियन्ते एभिः इति परिवाराः, तैः सहितः। तण्डुलकणलुब्धान्=तण्डुलकणानां लुब्धाः तण्डुलकणलुब्धाः, तान्। निर्जने=न विद्यन्ते जना यत्र इति

निर्जनम्, तस्मिन्।

**सन्धि विच्छेदः-**प्रछन्नो भूत्वा=प्रछन्नः +भूत्वा। अस्मिन्नेव=अस्मिन् +एव। विसर्पंस्तण्डुलकणान्=विसर्पन् +तण्डुलकणान्। कुतोऽत्र=कुतः+अत्र। प्राह=प्र+आह।

**प्रकृति प्रत्ययः-**विकीर्य=वि+कृ+ल्यप् (य)। प्रछन्न=प्र+छद्+क्त (त)। भूत्वा=भू+क्त्वा। विसर्पन्=वि+सृप्+शतृ (अत्) कुतः=किम् (कु)+ तसिल् (तस्)। भवितव्यम्=भू+तव्यत् (तव्य)।

**कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।**
**वृद्धव्याघ्रेण सम्प्राप्तः पथिकः स मृतो यथा ॥5॥**

**प्रसङ्गः-**लोभस्य परिणामोऽतीव दुःखदायको भवति।

**अन्वयः-**कङ्कणस्य तु लोभेन सुदुस्तरे पङ्के मग्नः पथिकः वृद्धव्याघ्रेण सम्प्राप्तः, स (पथिकः) यथा मृतः।

**व्याख्या-**कङ्कणस्य=कनकवलयस्य, तु लोभेन=प्राप्तिकामनया तु, सुदुस्तरे =निर्यातुमशक्ये, पङ्के=कर्दमे, मग्नः=निमज्जितः, पथिकः=यात्री पान्थो वा, वृद्धव्याघ्रेण=जीर्णकेसरिणा, सम्प्राप्तः=सम्यग् आक्रान्तः, (सन्) स पथिकः=लोभाविष्टः स पान्थः, यथा=येन प्रकारेण, मृतः=मृतवान्।

**सरलार्थः-**सुवर्णवलयलोभेन अतिकठिने पङ्के संलग्नो लोभाविष्टो ब्राह्मणो यथा वृद्धव्याघ्रेण सम्यग् आक्रान्तः सन् मृतः, तथैव वयमपि अत्र भवेम।

**व्याकरणम्-**

**समासः-**सुदुस्तरे=दुःखेन तरितुम् अशक्यं सुदुस्तरम्, तस्मिन्। वृद्धव्याघ्रेण= वृद्धश्चासौ व्याघ्रः वृद्धव्याघ्रः, तेन।

**सन्धिविच्छेदः-**स मृतो यथा=सः+मृतः+यथा।

**प्रकृति प्रत्ययः-**मग्नः=मस्ज् +क्त (त)। सम्प्राप्तः=सम्+ प्र+ आप्+ क्त(त)। पथिकः=पथिन्+ष्कन् (क)। मृतः=मृ+क्त (त)।

**छन्दः-**अत्र अनुष्टुप् नामवृत्तं वर्तते।

**कपोता ऊचुः-कथमेतत्? सोऽब्रवीत्-**

**व्याख्या-**कपोताः=पारावताः, ऊचुः=कथितवन्तः, कथम्=केन प्रकारेण, एतत्=इदम्, सः=चित्रग्रीवनामकः कपोतराजः, अब्रवीत्=अकथयत्।

## अभ्यासार्थ-प्रश्नाः

### बहुचयनात्मक प्रश्नाः -

अधोलिखितानां प्रश्नानां चतुर्षु विकल्पेषु समुचितमुत्तरं लिखत -

1. धीमतां कालो गच्छति
   (अ) विवादेन (ब) व्यसनेन (स) काव्यशास्त्रविनोदेन (द) शयनेन ( )
2. विशालशाल्मलीतरु आसीत्-
   (अ) भागीरथीतीरे (ब) गोदावरीतीरे (स) नर्मदातीरे (द) गण्डकीतीरे ( )
3. मित्रलाभे काकस्य नाम आसीत्-
   (अ) लघुपतनकः (ब) चित्रग्रीवः (स) जरद्गवः (द) हिरण्यकः ( )
4. व्याधेन विकीर्य जालं विस्तीर्णम्-

(अ) गोधूमकणान्  (ब) यवकणान्  (स) चणकचूर्णानि  (द) तण्डुलकणान्  ( )

5. कङ्कणस्य लोभेन मग्नः-

(अ) गहने कूपे  (ब) विशाले सागरे  (स) पङ्के सुदुस्तरे  (द) गण्डकी नद्याम्  ( )

**अतिलघूत्तरात्मक प्रश्नाः -**

1. राजप्रासादे के सुखोपविष्टा आसन् ?
2. राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण कः अब्रवीत् ?
3. धीमतां कालः केनप्रकारेण गच्छति ?
4. मूर्खाणां कालः कथं याति?
5. राजपुत्राणां विनोदाय केषां कथा पं.विष्णुशर्मा कथयति?
6. राजकुमाराणां कृते विष्णुशर्मा कां कथयति?
7. काककूर्ममृगाखुवत् कानि साधयन्ति?
8. गोदावरी तीरे कीदृशः तरु आसीत्?
9. तत्र कुतः आगत्य खगाः निवसन्ति?
10. वायसः कीदृशं व्याधम् अपश्यत् ?
11. काको व्याधानुसरणक्रमेण कीदृशश्चलितः?

?2. कति शोकस्थानानि सन्ति?

13. महद् भयमुपस्थितमिति कथं बोद्धव्यम्।
14. व्याधः किं कृत्वा जालं विस्तीर्णम्।
15. स पथिकः केन सम्प्राप्तः मृतः।

**लघूत्तरात्मकप्रश्नाः -**

1. मित्रलाभे केषां मित्राणां कथा वर्तते।
2. पण्डित विष्णुशर्मा प्रस्तावक्रमेण किंमकरोत्।
3. धीमतां मूर्खाणाः। कालः कथं गच्छति।
4. विष्णुशर्मा किमर्थं राजप्रासादे कथां कथयति।
5. असाधनाः वित्तहीनाः कस्य प्रकरणस्य श्लोकोऽस्ति।
6. पक्षिणः कुत आगत्य शाल्मली वृक्षे निवसन्ति स्म।
7. लघुपतनक वायसः कदा प्रबुद्धः।
8. व्याधं दृष्ट्वा वायसः किमचिन्तयत्।
9. कति कानि भयस्थानानि शोकस्थानानि च सन्ति।
10. प्रातः उत्थाय प्रतिदिनं किं बोद्धव्यम्।
11. व्याधः अरण्यं गत्वा किम् अकरोत्।
12. कपोतराजः तण्डुलकणान् कदा दृष्टवान्।
13. तण्डुलकणान् दृष्ट्वा कपोतराजः किं प्राह।
14. तण्डुलकणलोभेन कपोतानां कीदृशी स्थिति र्भविष्यति।
15. मूढाः कुत्र कदाऽऽविशन्ति।

**निबन्धात्मकप्रश्नाः -**

1. पण्डित विष्णुशर्मणः परिचयो देयः?
2. मित्रलाभस्य सारांशो लिखत?
3. व्याधस्य वर्णनं कुरुत?
4. पण्डित विष्णुशर्मा कथं राजपुत्रान् नीतिविज्ञान् कृतवान्।

**उत्तरमाला (बहुचयनात्मकप्रश्नानाम्)**

**(1)** स **(2)** ब **(3)** अ **(4)** द **(5)** स

**व्याकरणसम्बन्धिनः प्रश्नाः -**

1. सन्धिविच्छेदं कृत्वा सन्धेर्नाम लिखत -

| | | | | | |
|---|---|---|---|---|---|
| यथा - | सुखोपविष्टानाम् | = | सुख+उपविष्टानाम् | = | गुणसन्धिः |
| | राजपुत्रैरुक्तम् | = | .............. | = | .......... |
| | यस्यायमाद्यः | = | .............. | = | .......... |
| | प्रातरेवानिष्टदर्शनम् | = | .............. | = | .......... |
| | व्याकुलश्चलितः | = | .............. | = | .......... |
| | कुतोऽत्र | = | .............. | = | .......... |
| | प्रायेणाऽनेन | = | .............. | = | .......... |

2. प्रकृति-प्रत्ययौ लेख्यौ -

| | | | |
|---|---|---|---|
| यथा - | उपविष्टानाम् | = | उप+विश्+क्त+आम् |
| | पण्डितः | = | .................... |
| | धीमताम् | = | .................... |
| | बुद्धिमन्तः | = | .................... |
| | सुहृत्तमाः | = | .................... |
| | आगत्य | = | .................... |
| | प्रबुद्धः | = | .................... |
| | विस्तीर्णम् | = | .................... |

3. अधोलिखितवाक्येषु कोष्ठके निर्दिष्टलकारानुसारं लकारपरिवर्तनं करणीयम्-

**1.** काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।(लोट्)

**2.** भवतां विनोदाय कथां कथयिष्यामि।(लट्)

**3.** विष्णुशर्मा उवाच। (लृट्)

**4.** तत्र रात्रौ पक्षिणो निवसन्ति।(लङ्)

**5.** कपोताः तान् तण्डुलकणान् पश्यन्तु। (लिङ्)

4. (अ) असमस्तपदानां समासो विधेयः -

| | | |
|---|---|---|
| सुखेन उपविष्टानाम् | = | ........................ |
| राज्ञः पुत्राः | = | ........................ |
| लघु (द्रुतं) पतनं यस्य सः | = | ........................ |

| | | |
|---|---|---|
| चित्रग्रीव इति नाम यस्य सः | = | ...................... |
| वृद्धश्चासौ व्याघ्रः | = | ...................... |

(ब) समस्तपदानां विग्रहः कार्यः -

| | | |
|---|---|---|
| राजप्रसादे | = | ...................... |
| असाधनाः | = | ...................... |
| गोदावरीतीरे | = | ...................... |
| व्याकुलः | = | ...................... |
| सपरिवारः | = | ...................... |

5. अधोलिखितपदानां मूलशब्द-विभक्ति-वचन-लिङ्गादीनि निर्दिशत-

| | | |
|---|---|---|
| राजपुत्राः | = | ...................... |
| यूयम् | = | ...................... |
| धीमताम् | = | ...................... |
| चन्द्रमसि | = | ...................... |
| अस्माभिः | = | ...................... |
| वृद्धव्याघ्रेण | = | ...................... |

6. कोष्ठके स्थितं शब्दमाश्रित्य समुचितविभक्तिप्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

1. व्यसनेन च मूर्खाणां........... कलहेन वा।(निद्रा)
2. भवतां विनोदाय...........कथां कथयिष्यामि। (काककूर्मादि)
3. तत्रागत्य ........... पक्षिणो निवसन्ति।(रात्रि)
4. व्याधेन ........... विकीर्य जालं विस्तीर्णम्।(तण्डुलकण)
5. तण्डुलकणलोभेन ........... अपि तथा भवितव्यम्।(अस्मद्)